# अनुच्छेदविभागः

## प्रथमः अनुच्छेदः

अस्ति कश्चित् विदूषकः । तस्य परिहासेन नृपः सदैव हसति । एकदा विदूषकः चिन्तयति - मम परिहासेन प्रतिदिनं सकलाः जनाः हसन्ति । तथापि न कोऽपि जनः मां महापुरुषः इति कथयति । भवतु, अधुना सेनापतिपदं प्राप्तव्यम् । विदूषकः राजानं वदति- महाराज ! इच्छामि सेनापतिपदम् । राजा भाषते– तथास्तु । तदा विदूषकः नृपं खड्गं याचते । परिहासेन नृपः विदूषकाय दीर्घं खड्गं ददाति । तदा विदूषकः मोदते । सः खड्गं धृत्वा चलति । नृपः तं पृच्छति - कुत्र गच्छन्ति महाभागाः ? विदूषकः वदति - सैन्यसकाशं गच्छामि ।

## प्रश्नाः

1. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) कस्य परिहासेन नृपः सदैव हसति ?

(ख) नृपः विदूषकं किं पृच्छति ?

(ग) विदूषकः नृपं किं वदति ?

2. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) विदूषकस्य परिहासेन सकलाः जनाः किं कुर्वन्ति ?

(ख) अधुना विदूषकेण किं पदं प्राप्तव्यम् ?

(ग) परिहासेन राजा विदूषकाय किं ददाति ?

(घ) खड्गं प्राप्य कः मोदते ?

●●●